चक्रार्द्धस्य धनुराकृतित्वात् तस्योभयपार्श्वस्थरेखासंलग्नसरलरेखायाः ज्यारूपत्वात् तस्यार्द्धस्यैव लाघवेन शास्त्रकारैर्ग्रहणेन तदीयार्द्धस्य पिण्डसंज्ञा कृतेति बोध्यम्। ज्यार्द्धपिण्डोऽप्यत्र। [ राजनि० ।

**जीवाला** स्त्री जीवमालाति आ+ला—क। सैंहल्यां लतायां

**जीवास्तिकाय** पु० अर्हन्मतसिद्धे जीवपदार्थे अर्हच्छब्दे दृश्यम्। जीवशब्दे चोक्तप्रायः।

**जीविका** स्त्री जीव—अ कन् अत इत्त्वम्। १जीवनोपाये आजीवने। २जीवन्तीवृक्षे मेदि०।

**जीवित** न०जीव—भावे क्त। १जीवने प्राणधारणे "जीवितनाथो भवेत्तस्याः" सा० द० "नाभिनन्देत मरणं नाभिनन्देत जीवितम्" "जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः" मनुः। कर्त्तरि क्त। २जीवनयुक्ते त्रि०। "प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता" रघुः।

**जीवितकाल** पु० ६त०। आयुषि प्राणधारणसमये अमरः।

**जीवितज्ञा** स्त्री जीवितस्य जीवनस्य ज्ञा—ज्ञानं यस्याः। नाड्याम्। राजनि०। तस्याश्चलने हि नरस्य जीवनज्ञानात् तथात्वम्।

**जीवितेश** पु० ६त०। १प्राणनाथे यमे २चन्द्रे ३सूर्य्ये च शब्दरत्ना०। ४जीवातौ हेमच०। ५जीवितेश्वरे त्रि०मेदि०। "राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा" रघुः। चन्द्रसूर्य्ययोश्च देहमध्यस्थेडापिङ्गलानाड्योः स्थित्या प्राणसञ्चारणहेतुत्वात् तथात्वम्। "इडायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः" शा० ति०२५ पटले उक्तम्। इडाशब्दे ९२०पृ० दृश्यम् इडाशब्देऽनुक्तत्वात् प्रसङ्गात् इडापिङ्गलयोः स्वरूपादिकमत्रोच्यते "इडा वामे तयोर्मध्ये सुषुम्णा पिङ्गलापरे" शा० ति० "या वामशुक्रसंबद्धा सा श्लिष्यति सुषुम्णया। दक्षिणं शुक्रमाश्रित्य धनुर्वक्रा हृदिश्रिता। वामांसजत्रन्तरगा दक्षिणनासिकामियात्"। तथा दक्षिणशुक्रस्था नासयोर्वामरन्ध्रगा" पदार्थादर्शधृतवाक्यम्। तन्त्रान्तरेऽपि "सुषुम्णाकलितापीडा शुक्रं दक्षिणमाश्रिता। हृद्गता दक्षभागस्य जत्रुमध्यमसाश्रिता। दक्षिणानासिकाद्वारं प्राप्नोति गिरिजात्मजे!। वामशुक्रसमद्भूता तथाप्ता सव्यनासिकामिति" अनयोः स्वरूपस्तु योगार्णवे "इडा च शङ्खकुन्दाभा तस्याः सव्ये व्यवस्थिता। पिङ्गलाऽवितरक्ताभा दक्षिणं पार्श्वमाश्रितेति" "अनेन पिङ्गलेडयोः क्रमेण सूर्य्याचन्द्रमसोः स्थितिरुक्ता भवति" पदार्थादर्शः।

**जीविन्** त्रि० जीव—णिनि। १प्राणधारके प्राणिमात्रे २जीवनोपाययुक्ते च। "जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः। भक्तो वैद्यस्तं निहन्ति हरिभक्तिरसायनात्" ब्र०वै०गणे०ख०। "तत्र कालेन जायन्ते मानवा दीर्घजीविनः"। "शक्तः परजने दाता स्वजने दुःखजीविनः" मनुः। "पश्चात्तु शूद्राः कृषिजीविनश्च" "भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनि" मनुः स्त्रियां ङीप् "पुरुषायुषजीविन्यो निरातङ्का निरीतयः। यन्मदीयाः प्रजास्तस्य" रघुः।

**जीवेष्टि** स्त्री जीवोद्देशिका इष्टिः। बृहस्पतिसवे शब्दार्थचि०

**जीवोत्पत्तिवाद** पु० जीवस्य सङ्कर्षणाभिधस्योत्पत्तिवादः। पाञ्चरात्रवैष्णवसिद्धान्ते जीव्याख्योद्भवसाधने वादे तत्र हि "ब्रह्मणो वासुदेवाख्याज्जीवः सङ्कर्षणाभिधः। जायते च मनस्तस्मात् प्रद्युम्नाख्यं ततः पुनः। अहङ्कारोऽनिरुद्धाख्यश्चत्वारो विश्वरूपकाः। वासुदेवाराधनाद्धि जायते बन्धमोक्षणमिति"। तदेतन्मतं शा०सू०भा० निराकृतं यथा

"उत्पत्त्यसम्भवात्" सू०।

"येषामप्रकृतिरधिष्ठाता केवलनिमित्तकारणम् ईश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः, येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राक् निर्द्धारितः प्रकृतिश्चाधिष्ठाता चेति, श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः, तत् कस्य हेतोरेष पक्षः प्रत्याचिख्यासित इति। उच्यते। यद्यप्येवंजातीयकोऽंशः समानत्वान्नविसंवादगोचरो भवत्यस्ति त्वंशान्तरं विसंवादस्थानमिति, अतस्तत्प्रत्याख्यानायारम्भः। तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवः निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वं, स चतुर्धाऽऽत्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण सङ्कर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेण अनिरुद्धव्यूहरूपेण च वासुदेवो नाम परमात्मोच्यते, सङ्कर्षणो नाम जीवः, प्रद्युम्नो नाम मनः, अनिरुद्धो नामाहङ्कारः, तेषां वासुदेवः परा प्रकृतिः, इतरे सङ्कर्षणादयः कार्य्यं, तमित्थम्भूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति। तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा